श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ अष्टपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टपञ्चाशः सर्गः ॥

## ययातिं प्रति शुक्राचार्यस्य शापः

एवं ब्रुवति रामे तु लक्ष्मणः परवीरहा।
प्रत्युवाच महात्मानं ज्वलन्तमिव तेजसा॥ **7.58.1** ॥

महदद्भुतमाश्चर्यं विदेहस्य पुरातनम्।
निर्वृत्तं राजशार्दूल वसिष्ठस्य मुनेश्च ह॥ **7.58.2** ॥

निमिस्तु क्षत्रियः शूरो विशेषेण च दीक्षितः।
न क्षमं कृतवान् राजा वसिष्ठस्य महात्मनः॥ **7.58.3** ॥

एवमुक्तस्तु तेनायं रामः क्षत्रियपुङ्गवः।
उवाच लक्ष्मणं वाक्यं सर्वशास्त्रविशारदम्॥ **7.58.4** ॥

रामो रमयतां श्रेष्ठो भ्रातरं दीप्ततेजसम्।
न सर्वत्र क्षमा वीर पुरुषेषु प्रदृश्यते॥ **7.58.5** ॥

सौमित्रे दुःसहो रोषो यथा क्षान्तो ययातिना।
सत्त्वानुगं पुरस्कृत्य तन्निबोध समाहितः॥ **7.58.6** ॥

नहुषस्य सुतो राजा ययातिः पौरवर्धनः।
तस्य भार्याद्वयं सौम्य रूपेणाप्रतिमं भुवि॥ **7.58.7** ॥

एका तु तस्य राजर्षेर्नाहुषस्य पुरस्कृता।
शर्मिष्ठा नाम दैतेयी दुहिता वृषपर्वणः॥ **7.58.8** ॥

अन्या तूशनसः पत्नी ययातेः पुरुषर्षभ।
न तु सा दयिता राज्ञो देवयानी सुमध्यमा॥ **7.58.9** ॥

तयोः पुत्रौ तु सम्भूतौ रूपवन्तौ समाहितौ।
शर्मिष्ठाजनयत् पूरुं देवयानी यदुं तदा॥ **7.58.10** ॥

पूरुस्तु दयितो राज्ञो गुणैर्मातृकृतेन च।
ततो दुःखसमाविष्टो यदुर्मातरमब्रवीत्॥ **7.58.11** ॥

भार्गवस्य कुले जाता देवस्याक्लिष्टकर्मणः।
सहसे हृद्गतं दुःखमवमानं च दुःसहम्॥ **7.58.12** ॥

आवां च सहितौ देवि प्रविशाव हुताशनम्।
राजा तु रमतां सार्धं दैत्यपुत्र्या बहुक्षपाः॥ **7.58.13** ॥

यदि वा सहनीयं ते मामनुज्ञातुमर्हसि।
क्षम त्वं न क्षमिष्येऽहं मरिष्यामि न संशयः॥ **7.58.14** ॥

पुत्रस्य भाषितं श्रुत्वा परमार्तस्य रोदतः।
देवयानी तु सङ्क्रुद्धा सस्मार पितरं तदा॥ **7.58.15** ॥

इङ्गितं तदभिज्ञाय दुहितुर्भार्गवस्तदा।
आगतस्त्वरितं तत्र देवयानी स्म यत्र सा॥ **7.58.16** ॥

दृष्ट्वा चाप्रकृतिस्थां तामप्रहृष्टामचेतनाम्।
पिता दुहितरं वाक्यं किमेतदिति चाब्रवीत्॥ **7.58.17** ॥

पृच्छन्तमसकृत् तं वै भार्गवं दीप्ततेजसम्।
देवयानी तु सङ्क्रुद्धा पितरं वाक्यमब्रवीत्॥ **7.58.18** ॥

अहमग्निं विषं तीक्ष्णमपो वा मुनिसत्तम।
भक्षयिष्ये प्रवेक्ष्ये वा न तु शक्ष्यामि जीवितुम्॥ **7.58.19** ॥

न मां त्वमवजानीषे दुःखितामवमानिताम्।
वृक्षस्यावज्ञया ब्रह्मंश्छिद्यन्ते वृक्षजीविनः॥ **7.58.20** ॥

अवज्ञया च राजर्षिः परिभूय च भार्गव।
मय्यवज्ञां प्रयुङ्क्ते हि न च मां बहु मन्यते॥ **7.58.21** ॥

तस्यास्तद् वचनं श्रुत्वा कोपेनाभिपरीवृतः।
व्याहर्तुमुपचक्राम भार्गवो नहुषात्मजम्॥ **7.58.22** ॥

यस्मान्मामवजानीषे नाहुष त्वं दुरात्मवान्।
वयसा जरया जीर्णः शैथिल्यमुपयास्यसि॥ **7.58.23** ॥

एवमुक्त्वा दुहितरं समाश्वास्य स भार्गवः।
पुनर्जगाम ब्रह्मर्षिर्भवनं स्वं महायशाः॥ **7.58.24** ॥

स एवमुक्त्वा द्विजपुङ्गवाग्र्यः
सुतां समाश्वास्य च देवयानीम्।
पुनर्ययौ सूर्यसमानतेजा
दत्त्वा च शापं नहुषात्मजाय॥ **7.58.25** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टपञ्चाशः सर्गः॥